Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

संस्कृत-
साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८७
डिसेम्बर - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### शास्त्रेषुपूजा, व्यवहारे वेदना

केचन उत्तमाः विचाराः केवलं शास्त्रेषु कुण्ठिताः भवन्ति । तेषां व्यावहारिकाः प्रयोगाः विरलाः एव । अस्माकं शास्त्रेषु नारीणां सम्मानगाथा प्रसिद्धा खलु । नारीपूजा वेदेभ्योऽपि पुरातनी स्यात् । तथापि महाभारतकाले द्रौपद्याः घर्षणम् अभवत् । राजसभायां विहितः एवंविधः अपमानः कलियुगे अपि न अभवत् । द्रौपदी तु प्रतीकमात्रम् अस्ति । ततः वयं तदानीं वर्तमानस्य मनुष्यस्य मानसं परीक्षितुं शक्नुमः । अद्यापि एषा अपमानपरम्परा प्रशान्ता नास्ति । अद्यापि धनस्य बलेन नारीणां क्रयणं भोगोत्सवाः च प्रकामं क्रियन्ते । वेश्यार्थं प्रयुज्यमानाः शब्दाः अपि नारीणाम् अपमानं पिशुनयन्ति । यथा हि वारस्त्री (वारस्य वृन्दस्य स्त्री साधारणत्वात्), गणिका (गणः समूहः अस्ति अस्याः), वेश्या (वेशेन नेपथ्येन शोभते), रूपाजीवा (रूपम् आजीवः वृत्तिः अस्याः) इति ।

नारीणाम् अपमाने तान्त्रिकाः, कुतापसाः, दुष्टाः समाजसेवकाः च अल्पं प्रयत्नं न कुर्वन्ति । अधिकं दुःखं तु तदा जायते, यदा एतत् सर्वं दुराचरणं धर्मस्य पवित्रतायाः वा व्याजेन क्रियते । अद्य एकविंशे शतके अपि स्त्रीपुरुषयोः सहजीवनेन शोभमानं स्वस्थं समाजं निर्मातुं वयं न शक्तवन्तः । कारणं किम् ?

ईश्वरेण पुरुषेभ्यः शारीरं बलं दत्तम् । स्त्रीभ्यः तत् स्वल्पं दत्तम् । अत्रैव प्रवाहस्य विभाजनम् अभवत् । नानावृत्तानि अपि ततः एव विभक्तानि । स्त्रीपुरुषयोः कर्मसु विभाजनम् अभवत् । न तावत्, पुरुषस्य शारीरी शक्तिः स्त्रीरक्षणे उपयुक्ता अभवत् । सा शक्तिः तत्रैव न विरता । सा तु स्त्रीपीडने अपि प्रवृत्ता । रावणः भुजबलेन सीताम् अपहृतवान् । सा घटना पुरुषस्य भुजबलस्य निर्विचारं प्रदर्शनम् आसीत् । मानवजीवनस्य बहूनि शतकानि स्त्रीमानसस्य अवगमनेन एव व्यतीतानि । एकं सान्त्वनं निश्चयेन वर्तते यत् सम्प्रति स्त्रीपुरुषयोः चिन्तनं परस्परं मैत्रीं प्रति किञ्चित् लम्बितम् इव दृश्यते । एषः कलियुगस्य प्रभावः अस्ति । कलियुगे इतोऽपि उत्तमानि कार्याणि भवेयुः ।

वस्तुतः यत्र परस्परं विचारसम्पदां सेचनं नास्ति, तत्र आनन्दः नास्ति । आनन्दरहितं जीवनं शून्यम् अस्ति । शून्यं जीवनं शान्तिं ददाति । शान्तिः श्मशाने अपि भवति । वयं तु कलकलसहितां शान्तिं काङ्क्षामः ।

# अहो, अपरिहार्यं बन्धनम् !



"किम् एतस्य ग्रामस्य नाम वदनपुरम् इति ? अस्माकं समीरस्य ग्रामः एषः एव। किं जातं स्यात् तस्य ?" इति अपृच्छत् गुरुः पद्मानन्दः।

वदनपुरं पद्मानन्दस्य आश्रमात् विंशतिक्रोशदूरे अस्ति। क्षेत्रयात्रां कृत्वा शिष्याभ्यां सह प्रत्यागच्छन् पद्मानन्दः मध्येमार्गं वदनपुरं प्राप्य पूर्वोक्तं प्रश्नं कृतवान् आसीत्।

समीरः पूर्वं योगाभ्यासाय पद्मानन्दस्य आश्रमे वासं करोति स्म। गुरोः प्रियः शिष्यः आसीत् सः। एकस्मिन् दिने तेन वार्ता प्राप्ता यत् पितुः तीव्रम् अस्वास्थ्यम् इति। अतः पितुः दर्शनाय सः ग्रामं प्रत्यागतः। 'मासाभ्यन्तरे प्रत्यागमिष्यामि' इति उक्त्वा गतः आसीत् सः।

एषा सर्वा दशभ्यः वर्षेभ्यः पूर्वं प्रवृत्ता घटना। यदा वदनपुरं दृष्टं तदा गुरोः मनसि भावना उत्पन्ना यत् समीरः किं कुर्वन् अस्ति इति ज्ञातव्यम्।

पद्मानन्दस्य शिष्यौ मार्गे गच्छन्तं कञ्चित् तद्ग्रामीणं पृष्टवन्तौ – "एतस्य ग्रामस्य तरुणः, समीरनामकः पूर्वं पद्मानन्दाश्रमे निवसति स्म। किं भवता तद्विषये किमपि ज्ञायते ?" इति।

"समीरश्रेष्ठिविषये पृच्छ्यते ? आम्। सः पूर्वं पद्मानन्दवर्यस्य आश्रमे आसीत्। पितुः अस्वास्थ्यवार्तां श्रुत्वा सः प्रत्यागतः। पिता तस्य विवाहं निर्वर्त्य व्यवहारभारं तस्मिन् आरोपितवान्। गुरोः कृपया सः इदानीं सुखेन जीवति। तत् महत् भवनम् एव तदीयं गृहम्" इति वदन् सः ग्रामीणः प्रासादसदृशम् एकं भवनं दर्शितवान्।

गुरुः तच्छिष्यौ च बाह्यद्वारम् अतिक्रम्य गृहस्य पुरतः स्थितम् उद्यानं प्रविष्टवन्तः। समीरः गृहस्य ऊर्ध्वभागे स्थित्वा एतेषाम् आगमनं दृष्टवान्। झटिति धावन् आगत्य गुरोः पादौ स्पृष्ट्वा नमस्कृतवान्।

"इदानीं तु सायङ्कालः। अद्य रात्रौ भवता मम गृहे एव स्थातव्यम्। यदि भवान् कानिचन दिनानि मम गृहे वसेत् तर्हि अहं परमं सौभाग्यं प्राप्नुयाम्" इति निवेदितवान् सः।

रात्रौ तत्रैव स्थितिम् अङ्गीकृतवान् गुरुः। भूरिभोजनं व्यवस्थापितं समीरेण। रात्रौ सः एकान्ते अश्रूणि स्रावयन् गुरुम् अवदत् – "गुरुवर्य ! अहं कौटुम्बिकसूत्रेण बद्धः अस्मि। यदा मम पुत्रौ प्राप्तवयस्कौ भविष्यतः तदा अहं समग्रं व्यवहारं तयोः कृते समर्प्य आश्रमं प्रत्यागमिष्यामि। भवतः सेवां कुर्वन् शेषजीवनं सुखेन यापयिष्यामि" इति।

"आश्रमे यदि अहं न भवेयं तर्हि भवतः सहाध्यायिषु अन्यतमः आश्रमस्य प्रमुखः भवेत्। सः भवदर्थं सर्वां व्यवस्थां करिष्यति। भवता योगशास्त्रम् अधीतम्। अतः अध्यात्ममार्गः सर्वथा न त्यक्तव्यः भवता" इति अवदत् गुरुः।

अनन्तरदिने प्रातः गुरुः शिष्याभ्यां सह ततः निर्गतवान्। खेदेन एव समीरः गुरुं प्रेषितवान्।

पुनरपि दश वर्षाणि अतीतानि। गुरुः पुनरपि प्रयाणावसरे वदनपुरं प्रति आगतः। सः प्रियशिष्यस्य समीरस्य गृहं गतवान्। समीरः पुनरपि गुरोः पादौ गृहीत्वा अश्रूणि स्रावयन् – ''मम पौत्रः मयि अतीव प्रीतिमान् अस्ति। सः इदानीम् अल्पवयस्कः। यदा सः विद्यालयगमनसमर्थः भविष्यति तदा अहम् एतत्सर्वं परित्यज्य भवतः आश्रमम् आगमिष्यामि एव'' इति।

''अभीष्टसिद्धिरस्तु'' इति आशिषा अनुगृह्य गुरुः ततः निर्गतवान्।

अनन्तरवर्षे गुरुः दिवं गतः। मरणात् पूर्वं सः शिष्यान् अवदत् – ''समीरः न विस्मर्तव्यः। आश्रमं प्रति आगमनस्य इच्छां प्रबलतया सः वहति अद्यापि। किन्तु सः व्यामोहसूत्रेण बद्धः अस्ति। कथमपि सः रक्षणीयः अस्माभिः'' इति। कानिचन वर्षाणि अतीतानि। आश्रमस्य उत्तराधिकारिणः गङ्गानन्दस्य मनसि इच्छा उत्पन्ना यत् समीरस्य का स्थितिः इति ज्ञातव्यम् इति। 'समीरः कथमपि रक्षणीयः' इत्येषः गुरोः आदेशः तेन स्मर्यते स्म। अतः सः वदनपुरं गतवान्। तत्र तेन ज्ञातं यत् समीरः दिवं गतः अस्ति इति। समीरस्य पुत्राः तम् आदरेण स्वागतीकृत्य तदीयवासाय उत्तमां व्यवस्थां कृतवन्तः। यदा सः तत् गृहं प्रविष्टः तदारभ्य तद्गृहीयः शुनकः तदीयौ पादौ जिह्वया पुनः पुनः लेढि स्म, निरन्तरं पुच्छं चालयति स्म च। शुनकः सदा तेन सहैव स्थातुम् इच्छति स्म। रात्रौ कथमपि शुनकः दूरे स्थापितः। तस्य शुनकस्य विषये कुतूहलम् उत्पन्नं गङ्गानन्दस्य मनसि। रात्रौ प्रकोष्ठे ध्यानेन मनसः एकाग्रतां सम्पाद्य शुनकस्य पूर्वजन्मनः विवरणं प्राप्तं तेन। शुनकस्य अन्तः समीरस्यैव आत्मा आसीत्। चोरेभ्यः गृहस्य पुत्राणां च रक्षणं करोति स्म सः।

शुनकरूपी समीरात्मा प्रार्थयत् यत् शीघ्रातिशीघ्रम् एतस्मात् जन्मनः मम मुक्तिः स्यात् इति। 'तथास्तु' इति उक्त्वा अनन्तरदिने ततः निर्गतवान् गङ्गानन्दः।

पञ्चानां वर्षाणाम् अनन्तरं गङ्गानन्दः पुनरपि तद्गृहं प्रति आगतवान्। शुनकः दिवं गतः आसीत्। समीरस्य आत्मा इदानीं कुत्र स्यात् इति जिज्ञासा उत्पन्ना गङ्गानन्दस्य मनसि। रात्रौ ध्यानावस्थायां सः ज्ञातवान् यत् समीरस्य आत्मा सर्पशरीरं श्रितः अस्ति इति। गृहस्य अन्तः स्थितायाः काष्ठपेटिकायाः कोणे वसन् सः सर्पः गृहजनानां सम्पत्तिं जागरूकतया रक्षति स्म।

गङ्गानन्दः अचिन्तयत् यत् एतस्य परिहारोपायः कोऽपि चिन्तनीयः इति। अतः प्रातःकाले सः गृहजनान् सूचितवान् यत् पेटिकायां कोऽपि सर्पः निवसति इति। गृहजनाः अहितुण्डिकम् आनायितवन्तः। पेटिकायाः अन्तः धूमः प्रेषितः। तस्मात् सर्पः एकस्मिन् कोणे निश्चलतया अतिष्ठत्। अहितुण्डिकः तं गृहितवान्। कश्चन सेवकः तं सर्पं यदा प्रहर्तुम् उद्युक्तः तदा गङ्गानन्दः तं निवारितवान्। सर्पस्य मारणं सः न ऐच्छत्। सः सर्पं कस्मिंश्चित् घटे पूरयित्वा आश्रमं प्रति अनयत्। तत्र सः आसन्नमरणस्य सर्पस्य निमित्तं कांश्चन विधीन् अनुष्ठाय सर्पः सद्गतिं यथा प्राप्नुयात् तथा कृतवान्।

गङ्गानन्दः प्रवृत्तं सर्वं मनसि आकलयन् अचिन्तयत् – 'अहो, समीरः अध्यात्मासक्तः बुद्धिमान् च आसीत्। आवां सहाध्यायिनौ अपि आस्व दीर्घकालं यावत्। किन्तु दौर्भाग्यं नाम विषयवासनाग्रस्तः सः अज्ञानेन आवृत्तः आसीत्' इति।

## सुभाषितानां मनुष्य-व्यक्तित्व-विकासे प्रभावः

**व्योम शाहः**

( अनुवर्तते... )

प्रायः लोकाभिप्रायः तदेव वर्तते यत् सुभाषितं नाम नीतिवाक्यानि एव स्युः । किन्तु इदं सर्वतः सर्वथा च अपूर्णं सत्यम् अस्ति । नीतिवाक्यानि सुभाषितानां कश्चिद् एक वर्गः । चाटुश्लोकाः, समस्याः इत्यादीनि अपि सुभाषितस्य एव प्रकाराणि । तत्र काचित् परिभाषा नास्ति यद् एतत् सुभाषितं वा न । तस्य अभिधानम् एव ज्ञापयति यत् यत्किञ्चिदपि जनेन सुष्ठु भाषितं तत् सुभाषितम् एव ।

कालिदासस्य माल्विकाग्निमित्रं नाट्यं जनानाम् अनुरञ्जनार्थं कथाप्रकाशनार्थं तु विद्यते एव किन्तु तत्रापि साधु-जन-विलासार्थं तेन सुभाषितानि ग्रथितानि । यथा-

**पुराणमित्येव न साधु सर्वं, न चापि काव्यं नवमित्यवद्यम् ।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते, मूढः परप्रत्ययनेयबुद्धिः ॥**

ईदृशाः सुभाषितलवाः कालिदासस्य कृतिषु सर्वत्रापि दृश्यन्ते । तथैव कश्चिद् महाकविः भासः अभवत् । तेन त्रयोदश-नाटकानां रचना कृता । अस्य नाट्येषु स्थितानां सुभाषितलवानां विलक्षणता तदेव यद् एतैः जीवनस्य परमार्थ ज्ञायते । यथा - तासु रचनासु एकतमं स्वप्नवासवदत्तम् । तत्र एकेन एव पादमात्रेण कविः सुख-दुःखयोः गतिं ज्ञापयति । तद्यथा-‘**चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ।**’ क्षेमेन्द्रः नामधेयः कश्चिद् अल्पकीर्तितः कविः बभूव । तस्य एका विशिष्टा सुभाषितशतकस्य रचना । ‘चारुचर्या’ इति उपदेशात्मके ग्रन्थे कविना सुभाषितमाध्यमेन आदर्श-जीवनस्य कृते केचिद् उपदेशाः कृताः । एषाम् उपदेशानां वैशिष्ट्यम् अस्ति यद् एते नोपदेशमात्राः । कवेः प्रत्येकोऽपि उपदेशः एकेन पौराणिकेन उदाहरणेन समर्थितः । अर्थात् पादद्वये सः उपदिशति यद् एतत् कार्यं वा न कार्यं वा । अपरे पादद्वये कविः पौराणिकम् उदाहरणं प्रदर्शयति यत्र केनचित् तथा कृते तथाऽकृते वा कः परिणामः प्राप्तः । यथा-

**नासेव्यसेवया दध्याद् दैवाधीने धने धियम् ।**
**भीष्मद्रोणादयो याताः क्षयं दुर्योधनाश्रयात् ॥**

अर्थात् अस्मिन् शतोपदेशाः तेषां समर्थकाश्च शतोदाहरणानि । अस्यैव कवेः अपरा चैका कृतिः “दर्प-दलनम्” इति । स्वस्य पुत्रे सम्भूतं दर्पं शमयितुं कविना इयं कृतिः रचिता । राजयोगिनः भर्तृहरेः अपि अखिलं नीतिशतकं सौभाषितम् एव । तत्र राजयोगिना अपि स्वीयकवित्वशक्तेः अनन्यं प्रदर्शनं कृतम् । तस्य केचन श्लोकाः विद्वदवगम्याः इव प्रतिभान्ति । अनेन ज्ञायते यत् सुभाषितानि केवलं मूढावबोधप्रयोजनमात्राणि न किन्तु पथाद् अन्यतः गतान् विदुषः अपि सत्पथं नयनार्थं सम्प्रयुक्ताः । यथाऽयम् -

**सङ्गीत-साहित्य-कलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः ।**
**तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम् ॥**

इतोऽपि पण्डित-काशीनाथ-शर्मणः सुभाषित-रत्न-भाण्डागारः, कृष्णशास्त्र-भाटवडेकरस्य सुभाषित-रत्नाकरं, वल्लभदेवस्य च सुभाषितावलिः इत्यादयः सुभाषितसङ्ग्रहाः विश्वप्रसिद्धाः एव । आधुनिके अपि काले समागते इयं परम्परा न विच्छिन्ना । अद्यापि प्रतिदिनम् अनेकैः कविभिः अनेकानि सुभाषितानि लिख्यन्ते । बहुभिः सङ्कलनकारैः साहित्येभ्यः सुभाषितानि उद्ध्रियन्ते । कुशाग्र-अनेकितस्य आधुनिकानां सुभाषितानां रचनाः, माधव-

देशपाण्डे-वर्याणां सूक्तीनां रचना: इत्यादय: सौभाषितनावीन्यं प्रदर्शयन्ति । आन्तरजालमाध्यमेन क्रियमाण: महासुभाषितसङ्ग्रह:, श्रीधरव्यासवर्येण सङ्कलिता सूक्तिमञ्जूषा, इत्यादय: सुभाषितानां वर्धमानस्य महत्त्वस्य तं प्रति च लोकजागृते: सूचका: । बुध: क्वचिदपि अफलासु भूमिषु कालस्य वैयर्थ्यं न करोति । यदि भूमौ सत्त्वं दरीदृश्यते तर्हि एव स: प्रययते । अत: सुभाषितानां मनुष्यजीवने प्रभाव: अस्ति एव इति तु बुधै: अपि प्रमीयते । सुभाषितं मनुष्य-जीवनस्य पथ-दर्शकम् पथप्रकाशकञ्च । सुभाषितानां मनुष्यस्य जीवने महान् प्रभाव: इति तु अस्माभि: ज्ञातमेव किन्तु एतत् वैविध्यं वयं कथं वर्धितुं शक्नुयाम इति महान् प्रश्न: । उत्तरस्तु एक: एव - शिशव: ''बाबा ब्लेक-शीप, हेव यु एनी वूल'' इत्यस्य स्थाने ''अयं निज: परो वेति'' इत्यादी: सूक्ती: जानेयु: चेद् वरम् । अनेन एव वयं विदुष: सन्तोषयितुं समर्था: भवाम । दिनमात्रेण न किन्तु तेषां सन्ततं संस्कारेण मनुष्यजीवनम् औन्नत्यं प्राप्तुम् अर्हति । सुभाषितालङ्कृत: जन: सुभाषित: भवति । इत्यलं विस्तरेण । अस्तु ।

## मासवार्ता

### सम्पन्नौ संस्कृतभाषाशिक्षणस्य वर्गौ




संस्कृतभाषाया: अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्कृतभाषाशिक्षणस्य विविधस्तरीया: अभ्यासक्रमा: आयोज्यन्ते । उपक्रमेऽस्मिन् अगस्तमासस्य ११ दिनाङ्कत: नवेम्बरमासस्य २६ दिनाङ्कं यावत् संस्कृतभाषाशिक्षणस्य तृतीयस्तरस्य चतुर्थस्तरस्य च अभ्यासक्रम: प्राचलत् । अभ्यासक्रमेऽस्मिन् ४५ छात्रा: संस्कृतभाषाया: अध्ययनम् अकुर्वन् । डॉ. मिहिर: उपाध्याय: छात्रेभ्य: मार्गदर्शनं प्रायच्छत् ।

### आयोजितानि व्याख्यानानि

संस्कृतरसिका: संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयु: इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालाया: आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् नवेम्बरमासस्य १३ दिनाङ्के डॉ. भरत: शीलु: 'तर्कसङ्ग्रह का परिचय' इति विषये, नवेम्बरमासस्य २० दिनाङ्के श्रीभाग्येश: जहा ''रघुवंशम्'' इति विषये च व्याख्यानं प्रायच्छताम् । व्याख्याने श्रुत्वा संस्कृतरसिका: सन्तुष्टा: आसन् ।

## कृपया हसन्तु

एकदा दम्पती (पतिः पत्नी च) चलनचित्रदर्शनाय चलनचित्रगृहं गतवन्तौ । तत्र चलनचित्रस्य आरम्भे एव नायकनायिकयोः विवाहः सम्पन्नः । एतत् दृष्ट्वा पतिः पत्नीम् अवदत् - "चलतु गृहं शीघ्रं गच्छावः । एतत् वीररसप्रधानं चलनचित्रम् अस्ति । अस्मिन् चलनचित्रे अधुना भयङ्करं युद्धम् आरप्स्यते ।"

★ ★ ★ ★ ★

रमणः कस्यचित् आरक्षकस्य कोशे ज्वलिताम् अग्निशलाकां स्थापितवान् । अतः आरक्षकः तम् अगृह्णात् कारागारे अस्थापयत् च ।

न्यायाधिशः - (रमणम् उद्दिश्य) त्वया आरक्षकस्य कोशे अग्निशलाका किमर्थं स्थापिता ?

रमणः - (न्यायाधिशं प्रति) महोदय ! अहं कार्यक्रमस्य अनुमतिं स्वीकर्तुं गतवान् आसम् । तदा अयम् आरक्षकः एव माम् उक्तवान् यत् - 'यदि कार्यक्रमस्य अनुमतिम् इच्छति तर्हि मम कोशम् उष्णं करोतु ।'



## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**एकः स एव तेजस्वी सैंहिकेयः सुरद्विषाम् ।**
**शिरोमात्रावशेषेण जीयन्ते येन शत्रवः ॥**

**तात्पर्यम्** – राक्षसाणां मध्ये सिंहिकायाः पुत्रः राहुः एव तेजस्वी अस्ति । तस्य शिरः मात्रम् अवशिष्टम् । अथापि सः शिरो मात्रेण शतॄन् जयति ।

**एकचक्रो रथो यन्ता विकलो विषमा हयाः ।**
**आक्रमत्येव तेजस्वी तथाप्यर्को नभस्तलम् ॥**

**तात्पर्यम्** – रथे एकम् एव चक्रम्, सारथी विकलाङ्गः, रथस्य अश्वाः विषमसङ्ख्यकाः, तथापि सूर्यः स्वतेजसा एव आकाशं पृथ्वीं च आक्रमति ।

**एकेनापि हि शूरेण पदाक्रान्तं महीतलम् ।**
**क्रियते भास्करेणेव स्फारस्फुरिततेजसा ॥**

**तात्पर्यम्** – यथा रविः अत्यन्तविशालतेजसा सम्पूर्णां पृथ्वीं व्याप्नोति तथैव एकः एव वीरः शौर्येण सम्पूर्णां पृथ्वीं निश्चयेन स्वायत्तीकर्तुं शक्नोति ।

## ज्ञानसरिता

श्यामः पटेलः

**पृथिव्याम् अद्भुतः द्रवः – जलम्** – पशुपक्षिमनुष्यवनस्पतीनां जीवनाय जलस्यप्राथमिकी आवश्यकता। पृथ्व्याः उपरि जलमस्ति ततः जीवसृष्टिः अपि अस्ति। किन्तु प्रकृतेः अन्येभ्यः तत्त्वेभ्यः जलम् ईषद् भिन्नं वर्तते। अतः एव सर्वासु संस्कृतिषु जलं देवतारूपेण पूज्यते। जलस्य राशिः पृथिव्याः उपरि द्वि–अर्बुदवर्षेभ्यः समानरूपेण अवस्थितः अस्ति। केवलं तस्य स्वरूपे परिवर्तनं भवति। विश्वस्य हिमनदीषु तावत् जलमस्ति यत् यदि तत् सर्वं जलं वर्षारूपेण वर्षति तर्हि पृथ्व्याः उपरि षष्टिवर्षाणि यावत् वर्षा एव भवेत्! समुद्रस्य जलात् सूर्यातपेन भावितः बाष्पः वातावरणे १० दिनानि यावत् तिष्ठति। अनन्तरं मेघः भूत्वा वर्षति। इदं जलं यदा हिमः भवति तदा जलस्य आकारः विस्तृतः भवति। भूमेः ७० प्रतिशतं जलं कृषिकार्येषु उपयुज्यते। सामुद्रे जले भूतेषु हिमखण्डेषु सामुद्रिकलवणस्य उपस्थितिः न भवति इति विशेषम्। जलमेव विशिष्टः द्रवः यस्मिन् अन्येषाम् अपेक्षया अधिकवस्तूनि तस्मिन् द्रवीभवन्ति। जले क्षारस्य परिमाणं Parts Per Trillion (PPT) इत्यनेन ज्ञायते। PPT इत्यस्य अर्थः भवति यत् १ किलोग्रामपरिमिते जलं १ ग्रामपरिमितः क्षारः अस्ति। यदि जले अधिकः क्षारः तर्हि तस्य क्वथने अधिकः समयः भवति। तथैव तस्मात् जलात् हिमः अपि विलम्बेन सम्भवति। जलं यदा बाष्पः भवति तदा तस्याकृतिः १४ गुणात्मिका वर्धते। बाष्पः अधिकां शक्तिम् उत्पादयति।

राशिः – quantity, अर्बुदम् – १०,००,००,०००, सूर्यातपः – heat of the sun
द्रवः – liquid, fluid, क्वथनम् – boiling, हिमः – ice, बाष्पः – steam

## शब्दमञ्जूषा

| | |
|---|---|
| **विश्रामालयः** | rest house |
| **प्रत्यपकारः** | retaliation |
| **प्रतिशोधः** | revenge |
| **सत्कारः** | reverence |
| **विभवः** | riches |
| **प्रतिस्पर्धी** | rival |
| **प्रतिस्पर्धा** | rivalry |
| **धूर्तः** | rogue |
| **स्वत्वशुल्कम्** | royalty |
| **अविनयः** | rudeness |
| **शासनम्** | rule/reign |
| **क्रूरः** | ruthless |
| **बलिदानम्** | sacrifice |
| **ऋषिः** | sage |
| **नाविकः** | sailor |

## किं भवन्तः जानन्ति ?

**१ ) कति ज्योतिर्लिङ्गानि सन्ति ?**
(क) द्वादश (ख) पञ्चदश (ग) अष्टादश (ग) एकविंशतिः

**२ ) मनुष्यजीवनं कति आश्रमेषु विभक्तमस्ति ?**
(क) त्रिषु (ख) चतुर्षु (ग) पञ्चसु (घ) षट्सु

**३ ) कतिप्रकारकाः संस्काराः भवन्ति ?**
(क) १४ (ख) १५ (ग) १६ (घ) १७

**४ ) कतिप्रकारकाः शृङ्गाराः भवन्ति ?**
(क) त्रयोदश (ख) चतुर्दश (ग) पञ्चदश (घ) षोडश

**५ ) कति संवत्सराः सन्ति ?**
(क) ४० (ख) ५० (ग) ६० (घ) ७०

**६ ) कति पुर्यः सन्ति ?**
(क) दश (ख) नव (ग) सप्त (घ) अष्ट

**७ ) कति योगिन्यः भवन्ति ?**
(क) ६० (ख) ६२ (ग) ६४ (घ) ६६

उत्तराणि – (१) क (२) ख (३) ग (४) घ (५) ग (६) ग (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

Value Education Through Sanskrit in

## बालसंस्कारकेन्द्रम्

(Class 4 to 6)

## बालसंस्कृतकेन्द्रम्

(Class 7 & 8)

**Date :** 27/11/21 to 16/04/22
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 3500/-

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First level**

**Date :** 8/12/21 to 11/3/22
**Day :** Mon-Wed-Fri
**Time :** 7:30 am to 9:00 am (IST)
**Fees :** 5000/-

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतधाराप्रवाहः

**Date :** 15/12/21 to 16/12/22
**Day :** Every Wednesday
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 7000/-

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006